ॐ गं गणपतये नमः।

JANUARY • 2001 ॐ परमात्मने नमः।

29 MONDAY

ॐ अथातश्चाक्षुषीं पठेत्। सर्वविद्यां चक्षुरोगहरां व्याख्यास्यामो यथा चक्षुरोगाः सर्वतो नश्यन्ति। चाक्षुषी दीप्तिर्भवति।

तस्याश्चाक्षुषी विद्यायाः अहिर्बुध्नि ऋषिः गायत्री छन्दः सविता देवता चक्षुरोग-निवृत्तये जपे विनियोगः।

ॐ चक्षुः चक्षुः चक्षुः तेजः स्थिरो भव। मां पाहि पाहि त्वरितं चक्षुरोगान् शमय-शमय मम जातरूपं तेजो दर्शय-दर्शय। यथाहं अन्धो न स्याम् तथा कल्पय-कल्पय। कल्याणं कुरु-कुरु। यानि मम पूर्वजन्मोपार्जितानि चक्षुः प्रतिरोधक दुष्कृतानि सर्वाणि निर्मूलय-निर्मूलय।

ॐ नमः चक्षुः तेजो दात्रे दिव्याय भास्कराय। ॐ नमः करुणाकराय अमृताय। ॐ नमः सूर्याय। ॐ नमो भगवते सूर्याय आक्षितेजसे नमः। खेचराय नमः। महते नमः। रजसे नमः। तमसे नमः। असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय। उष्णो भगवान् शुचिरूपः। हंसो भगवान् शुचि प्रतिरूपः।

य इमां चाक्षुष्मतीं विद्यां ब्राह्मणो नित्यम् अधीते न तस्याक्षिरोगो भवति। न तस्य कुले अन्धो भवति। अष्टौ ब्राह्मणान् ग्राहयित्वा विद्यासिद्धिर्भवति।

ॐ नमो भगवते आदित्याय अहोवाहिनि अहोवाहिनि स्वाहा!

ॐ पुण्डरीकाक्षाय नमः। ॐ पुष्करेक्षणाय नमः। ॐ निर्मलनेत्राय नमः। ॐ अमलेक्षणाय नमः। ॐ कमलेक्षणाय नमः। ॐ विश्वरूपाय नमः। ॐ महाविष्णवे नमः।

ॐ रहि सूर्य सहस्त्रांशो तेजोराशे जगत्पते। अनुकम्पय मां भक्त्या, गृहाणार्घ्यं दिवाकर!

ॐ दिवाकराय नमः।

2001

S	•	14	28
M	1	15	29
T	2	16	30
W	3	17	31
T	4	18	•
F	5	19	•
S	6	20	•
S	7	21	•
M	8	22	•
T	9	23	•
W	10	24	•
T	11	25	•
F	12	26	•
S	13	27	•

FEB 2001

S	•	11	25
M	•	12	26
T	•	13	27
W	•	14	28
T	1	15	•
F	2	16	•
S	3	17	•
S	4	18	•
M	5	19	•
T	6	20	•
W	7	21	•
T	8	22	•
F	9	23	•
S	10	24	•